# वेदाङ्गज्योतिषे नाक्षत्रज्योतिषम्

**डॉ. प्रयागनारायण मिश्रः-**
**आसि.प्रोफेसरः,संस्कृतविभागः**
**लखनऊ-विश्वविद्यालयः ।**

वेदाङ्गज्योतिषरूपेण लब्धप्रतिष्ठग्रन्थरत्नेषु प्रजापतिप्रोक्तमात्मज्यौतिषमित्य-पराभिधमाथर्वणज्यौतिषमपि लगधप्रणीतार्चयाजुषज्योतिषवदेव भारतीयज्योतिषशास्त्रस्य श्रीसंवर्धनं करोति । वस्तुतो वेदाङ्गज्यौतिषग्रन्थरत्नमिदमाथर्वणज्यौतिषमेव वेदाङ्ग ज्योतिषस्वरूपमापूरयति। अत आथर्वणज्यौतिषम्इति सञ्ज्ञकस्य आत्मज्यौतिषमित्यपराभिधस्य प्रजावति प्रोक्तस्य वेदाङ्गज्योतिषग्रन्थरत्नस्याऽद्वितीयं स्थानं न कस्याऽपि ज्योतिर्विदोदृष्टेरविषयः । त्रिस्कन्ध ज्योतिषपरम्परायां होरास्कन्धस्य जातकशाखान्तर्गतं नक्षत्राधृतं वैदिकपरम्परामधिकृत्य यादृशं निरूपणम् आथर्वणज्योतिषे दृष्टिपथमुपयाहि न तादृशमन्यत्र ।

विविधज्योतिर्वैज्ञानिकत्त्वेषु राशिग्रह-नक्षत्रादिषु वैदिकवाङ्मये नक्षत्राणां वैभवं बहुधा उररीकृतम् । पुराकालादेव भारतीयचिन्तका ऋषयो वा नक्षत्रैः सुठु परिचिता आसन् । वैदिकसंहिताषूपलब्धमतमेतेषां विवरणं स्फुटं प्रमाणयति । वैदिकमन्त्रसंहिताषु नक्षत्रशब्दस्य व्युत्पत्तिलभ्योऽर्थस्तारागणः प्रतीयते ये खलु सततं गतिमन्तः स्वीकृताः । एतस्मादेव कारणादाचार्येण यास्केन नक्षत्रशब्दोऽयं नक्षतेर्गतिकर्मणो निर्मितोऽवाचि-

नक्षत्राणि नक्षतेर्गतिकर्मणः।

किन्तु बृहत्पाराशरहोराशास्त्रेऽक्षरणत्वादेतानि नक्षत्राणि निश्चलानि प्रोक्तानि तेजः पुञ्जः न वीक्ष्यन्ते गगने रजनीषु ये । नक्षत्रसञ्ज्ञकास्ते तु न क्षरन्तीति निश्चला ।।

ऋग्यजुरथर्ववेदेष्वपि नक्षत्रशब्दोऽयमनेकत्राऽस्मिन्नेवार्थे व्यवहृतो वर्तते । यत्र-तत्र आदित्येन सहितं नक्षत्रोल्लेखपूर्वकं चन्द्रमसा सह नक्षत्राणां स्थायिसम्बन्धोऽङ्गी क्रियते । किमधिकं बैदिकमन्त्रसंहिताषु चन्द्रस्तु नक्षत्राणामधिपतिरङ्गीकृतः-

''चन्द्रमा नक्षत्राणामधिपतिःसमाववतु'' चन्द्रमानक्षत्राणामीशे'' अथ च नक्षत्राणामेषामुपस्थे सोम आहितः इत्युक्त्वाऽपि महमिदं समर्षितम् । अत इदं प्रतिभाति यच्चन्द्रमार्गे आपतितानां

नक्षत्राणां सहितमखिलतारकाणां नक्षत्र इति सञ्ज्ञा कृता । अतो निष्कर्षरूपेण वक्तुमिदं शक्यते यत् सामान्यतया नक्षत्र शब्देन तारागणो वाच्यः । नक्षत्रशब्देन वाच्योऽयं तारागणः ऋग्वेदे सप्त विंशति-नक्षत्रेभ्यो मण्डित आभाति यतोहि ऋग्वेदे सप्त विंशतिनक्षत्राणि प्रोक्तानि । किन्त्वथर्व वेदेऽष्टाविंशति नक्षत्राणां स्पष्टतयोल्लेखः कृतः एतस्मादेव कारणादेकास्मिन् मन्त्रेऽष्टाविंशति शिबानि शग्मानि सहयोगं प्रार्थयन्ते-

अभिजित नक्षत्रं विहाय तैत्तिरीयकाठक संहितयोरपि नक्षत्राणां संङ्ख्या सप्तविंशतिरूक्ता। अतोऽभिजित् नक्षत्रेण सहाऽत्राऽपि नक्षत्रसङ्ख्याऽष्टाविंशहिरङ्गीकृता । अतोभिजत्-नक्षत्रेण सार्द्धं नक्षत्राणां सङ्ख्याऽष्टाविंशतिरेवे व्यहित सर्वथासिद्धं वैदिकबाङ्मयेन । भिन्न भिन्नवैदिक संहिताषु स्वल्पभेदपूर्वकं येषांमष्टाविंशहिनक्षत्राणां यदुल्लेख प्राप्यते तत्र अभिजित-नाम नक्षत्रमेकमङ्गीकृतम्। इमंनक्षत्र विहाय नक्षत्राणि सप्तविंशहासङ्ख्यकान्येव सन्ति । वस्तुत अभिजित् नक्षत्रमिदं क्वचिन्नक्षत्ररूपेण क्वचित् केवलं मुहूर्तरूपेण क्वचिच्च मुहूर्तनक्षत्रयोरुभयोरपि रूपेणाऽङ्गीक्रियते।

आथर्वणज्योतिषेतिहासे यद्यपि नक्षत्राणां नामोल्लेखेन सार्द्धमेव नक्षत्रसङ्ख्या विषयेऽपि स किमव्युक्तं स्पष्टरूपेण, किन्तु नवमे प्रकरणे नक्षत्राणां यद्धर्मनिर्धारण कृतं तत्र नवानां त्रिकवर्गाणामुल्लेखेन प्रतिभाति यदत्र सप्तविंशहिसङ्ख्यकानि नक्षत्राण्येवाङ्गाकृतानि । अतो निश्चप्रचमेवेदमाहि यद् अभिजित् नक्षत्रमाथर्वण्ज्योतिषे नाऽङ्गीकृतम् । किन्तु वेदाङ्ग ज्योतिषमिंदमार्थवण ज्यौतिषम् अभिजित् -नाम्नाऽपिरिचितं नाऽस्ति । आथर्वणज्यौतिषेतभिजित् नाम्ना एको मुहूर्तो ङ्गीकृतः आथर्वणज्योतिषस्याऽऽद्ये मुहूर्तेप्रकरणेऽहिनवदेव रात्रावपि पञ्चदशमुहूर्त्ताः प्रकीर्तिताः ।

**एते मुहूर्त्ता व्याख्याता दश द्वौ च तथा त्रयः ।**
**अहन्येव तु विज्ञेया रात्रावपि न संशयः ।।**

रौद्र श्वेत-मैत्र सारभट सावित्र-वैराज विश्वावसु-अभिजित्-रोहिण-बल विजय-नैटित-वारुण सौम्य-भगसञ्ज्ञकेषु पञ्चदशमुहूर्ते मध्ये च प्रायोमध्याह्न भावि मुहूर्तेविशिष्ठ टोडभिजत् नाम्नाऽऽथर्वणज्योतिषेऽङ्गी कृतः-

**मध्याह्ने चाभिजन्नाम यस्मिन् छाया प्रतिष्ठति ।**

आथर्बणज्योहिषेऽभिहितं मतमिदं प्रायः सर्वैरेव ज्योतिर्विद्भिरङ्गी क्रियते । आथर्वणज्योतिषे प्रतिदिनं द्वादशाङ्गुलपरिमाणात्मकं शङ्कुमेवाश्रित्य छायायाः शङ्कुमूल आगतेऽयं मुहूर्तोऽङ्गीकृतः यतोहि काशिनाथप्रणाते शीघ्रबोधे शङ्कोः परिमाणं साप्ताहिंक दिवसविशिष्टंमधिकृत्य पृथक् पृथक प्रोक्तम् किन्तु तत्राऽपि भणितं यद् यदा शङ्कोच्छाया शङ्कमूले प्रजायते तदैकघटिकात्मिकोऽभि जिन्मुहूर्तो भवति-

**शङ्कमूले यदाच्छाया मध्याह्न च प्रजायते ।**
**तदा चाभिजिदाख्याता घटिकैका स्मृता बुधैः ।।**

ज्यौतिषशास्त्रेऽस्याऽभिजिन्मुहूर्त्तस्य फलसुद्धीर्तनं भूरिशः कृतम् । आथर्वणज्यौतिषे मुहुर्तोऽयमभिजन्नाम चाहुर्वर्ज्येभ्योऽतिमङ्गलप्रदोऽभिहितः-

**ब्रह्मक्षत्रियवैश्यानां शूद्राणां चाऽपि नित्यशः ।**
**सर्वेषामेव वर्णानां योगो मध्ये दिनेऽभिजित् ।।**
**क्रिमधिकामाथर्वणज्यौतिषेऽयं मुहूर्तः सर्वार्थसाधकः प्रोक्तः-**
**अभिजत् सर्वकामाया सर्वकामार्थसाधनः ।**
**अर्थसञ्चयमानानामध्वानं गन्तुमिच्छताम् ।।**

एताद्वशमेव फलसुङ्कीर्तनं कुर्वताऽऽचार्येण काशिनाथेनोक्तं यदस्मिन् मुहूर्ते प्रसूतो जातको नृपो भवति अथ च व्यापारादिके तस्योत्तमा सिद्धिजीयते बहवः क्रूरयोगा अपि मुहूर्तस्याऽस्य मङ्गलस्वरूपमपहन्तुं नैव पारयन्ति-

**अत्र कार्याणि सर्वाणि सिद्धिं यान्ति कृतानि च ।**
**जातोभिजिति राजा स्याद्व्यापारे सिद्धिरुत्तमा ।**
**महाक्रूरवियोगेन सर्वमङ्गलदायकः ।।**

अतोऽष्टाविंशतिनक्षत्रप्रसङ्गेधिगतं नक्षत्रस्वरूपमिदमभिजिजिन्नाम नक्षत्रं वेदाङ्गज्योतिषस्याऽऽथर्वणज्योतिषे नक्षत्रत्वेनाऽस्तित्वं नोद्वहति । अतो निषकर्षरूपेण वक्तुमिदं शक्यते यदभिजित्सञ्ज्ञकं मुहूर्त्तं नक्षत्रं नाऽङ्गीकृत्य सप्त विंशतीनामेव नक्षत्राणामस्तित्वं प्रामाणिकं प्रतीयते । ऋग्वेदवदेव युजर्वेदेऽप्येकस्मिन् मन्त्रे सप्तविंशतिनक्षत्राणि। गन्धर्वरूपेण चित्रितानि ।

आथर्वणज्यौतिषे यद्यपि नक्षत्रसंख्याविषये नक्षत्राणां नाम्नि प्रसङ्गे वा किमपि नोक्तं किन्तु नक्षत्रवर्गसञ्ज्ञके नवमे प्रकरणे नवानां त्रिकाणां यन्निरूपणं विहितं तेनाऽवगम्यते यदाथर्वज्यौतिषे नक्षत्राणां सङ्ख्या सप्तविंशतिरेवाऽस्ति । अभिजितो मुहूर्त्तत्वेनास्त्विं प्रतिष्ठाप्पेयमवधारणा सर्वथा पुठणाति ।। भारतीय ज्यौतिषपरम्परायां श्रवणोत्तराषाढयोर्मद्यृये यदभिजिन्नक्षत्रं परिगणितं जातं तस्य मासिकं काल विभाजनं काल निर्धारणं वा न कुत्राऽपि प्राप्यते । पञ्चाङ्गेठवपि नक्षत्राणां यादृशं दैनन्दिनं कालनिर्धारणं कृतं तत्राऽपि उत्तराषाढानन्तरं कालक्रमव्यवधानेन विनैव श्रवणनक्षत्रमापतति अत एवात्र शङ्काया लेशमात्रमप्यवकाशो न विद्यते यदभिजत् सज्ज्ञकमिदं कालचक्रं प्रतिदिनं मध्याहनमुहूर्त्तरूपेणैवाङ्गीकार्यं न तु नक्षत्ररूपेण । अतोऽथर्ववेदीयमाथर्वणज्यौतिषगत-मभिमतमधिकृत्य वैदिकं नाक्षत्रज्योतिषमत्र परीक्ष्यते ।।

वैदिक ऋषिभिर्नक्षत्राणां शुभाशुभत्वं सुठु चिन्तितं येन ज्योतिर्विज्ञानस्य फलितपक्षमधिकृत्य नाक्षत्रज्योतिस्योन्मेषो भवति । ज्योतिषशास्त्रस्येतितिहासावलोकनेनाऽवगम्यते यद् वैदिककाले त्रिस्कन्धज्योतिषस्य होरास्कन्धे नक्षत्राणामेव शुभाऽशुभत्वं सुष्ठु प्रपञ्चितम् । जातकानां जन्मनक्षत्ररूपेणाऽशुभनक्षत्राणां फलसुद्धीकर्तनं वैदिकमन्त्रसंहितासु बहुधा निरूपितम् अथर्ववेदस्यैकेन मन्त्रेण मूलज्येष्ठानक्षत्रयोरशुभत्वमेवमकारि ज्येष्ठकन्यां जातो विचृतोर्यमस्य मूलबर्हणात् परिपाहयेनम् ।

**अनेनैवं व्यज्यते यज्ज्यष्ठानक्षत्रे जातो जातको**
**ज्येष्ठस्य पितृभ्रात्रादेर्हन्ता भवति तथा ।।**

विचर्तन स्वभावे मूलनक्षत्रे उत्पन्नो जातकः सर्वं कुलं हिनस्तीति/परिर्तीज्यो तेषु ग्रन्थेष्वपि मूलज्येष्ठानक्षत्रयोरयुक्त मूलनक्षत्रत्वमङ्गीकृत्य तयोरशुभत्वमणिष्टकारित्वश्चाभिहिता अभुक्तमूलं घटिका चतुष्टयं ज्येष्ठान्व्य मूलादिभवं हि नारदः।

विषयेऽस्मिन्नेतदप्यवधेयं तथ्यं यन् मूलनक्षत्रस्याऽधिष्ठातुदेवता पापकारिणी निर्ऋतिः स्वीकृता । अतोऽस्याडशुभत्वमुचितमिति प्रतिभाति । भारतीयज्योतिषशास्त्रे नक्षत्राणां स्वरूपविवेचनप्रसङ्गे बहुविधनिरूपणं कृतम् । आश्लेषा नक्षत्रेण सार्धं मूलज्येष्ठानक्षत्र योर्गणना दारुण सज्ज्ञेकेषु नक्षत्रेषु भवति । क्वचिद् ध्रुवचदोग्रमिक्षलघुमृदुतीक्ष्णवर्गेषु क्वचिद् ऊर्ध्वोऽधस्तिर्यङमुखवर्गेषु नक्षत्राणां वर्गीकरण कृतम् । आथर्वणज्यौतिषे नक्षत्रस्वरूपविषयकमेतादृशं

किमपि नैवाऽभिहितं किन्तु जातकस्य जन्मनक्षत्रमधिकृत्य क्रियमाण कर्म दिवसेषु तत्तन्नक्षत्रस्य शुभाऽशुभत्वं सुदृढ निभालितम् । अतो व्यज्यते यदाथर्वणज्यौतिषे नक्षत्राणां शुभाऽशुभत्वं केवलं नक्षत्रविशेषस्य वैयक्तिकं स्वरूमेव नाऽपेक्षतेऽपितु जातकस्य जन्मनक्षत्राधृतं तन्नक्षत्रवर्गमधिकृत्यै व तस्य शुभाऽशुभत्वं निरपेक्षतया वक्तव्यम् । अत एवाऽत्र आथर्वज्योतिषे नक्षत्राणाम शुभाऽशुभत्वं पृथक्पुरुषविज्ञेयमिति प्रोक्तः

**पृथक्पुरुषविज्ञेयं नक्षत्राणां शुभाऽशुभम् ।**
**आत्मसम्पत्करं ज्ञेयमात्मानमृद्धिमिच्छताम् ।**

अतः कश्चिन्ननक्षत्रं कस्यचित्पुरुषार्थ शुभावहमन्यार्थश्च तदेवनक्षत्रमशुभङ्करं भवितुमर्हति। शुभनक्षत्रमपि नवनक्षत्रवर्गेऽशुभवर्गत्रिये यदि तृतीय चश्चम सप्तमवर्गे स्वानमुपयाहि तथा तदपि निश्चप्रमेवाऽशुभावहं भवति किन्तु क्रूरतीक्ष्णादिस्वरूपात्मकं नक्षत्रं यदि नवनक्षत्रवर्गेषु शुभवर्गमाश्र यति तदा तच्छुभत्वं वक्ष्यति न वा इत्यस्ति विचारणीयो विषयः । वस्तुतः सर्वाण्येव नक्षत्राणि तत्तकर्मविशेषभधिकृत्य शुभाऽशुबत्वं वहन्ति यतोहि अभिचार-घात भेदादिक्रूरकर्मणि तु तीक्ष्णदारुणसञ्ज्ञेकेठवेन मूल-ज्येष्ठाऽऽश्लेषादिनक्षत्रेषु साफल्यतां प्रापयन्ति । अतो नवनक्षत्रवर्गोऽयं सर्वत्रैव चिन्तनीयः। आथर्वणज्यौतिषे निर्दिष्टोऽयं विषयोऽन्यत्राऽपि ज्योतिषेसुठठ विमृष्टोजातः

आथर्वणज्यौतिषे येषां नवसङ्ख्यकानां त्रिकाणामुल्लेखः प्राप्यते तेषूत्तममध्यमाधमवर्गेण विभाजनं कृत्वा क्रमशेः जन्म विपत् प्रत्वर नैधनसञ्ज्ञकाः प्रथमतृतीयपञ्चमसप्तमवर्गाः सर्वेषु शुभकार्येषु त्याज्याः शेषैः वर्गपश्चकनक्षत्रैः सर्वाणि शुभकर्माणि कर्तव्यानि-

**नवनक्षत्रके वर्गे प्रथमं तृतीयं तु वर्जयेत् ।**
**पञ्चमसप्तमं चैव शेषैः कार्याणि कारयेत् ।**[२७]

एतेषु नवनक्षत्रवर्गेषु केवलं जन्मनक्षत्रविशेषेण सार्द्धं त्रिपश्चसप्तवर्गास्तु प्रायः सर्वैरेव ज्योतिर्विदर्भिवर्जिताः तारा शुभप्रदाः सर्वास्त्रिपश्चसप्तवर्जिताः[२८]।।

नवनक्षत्रवर्गाणामेतेषां ग्राह्यऽग्राह्य तु निर्दिष्टय नक्षत्रवर्गनवकमि दमेकैकशो निरूपणयणीयं यतोहयेतेषां सम्मयग् ज्ञानेनैव ग्राह्याऽग्राहयत्वं सम्भविष्यति । आथर्वणज्यौतिषे नव नक्षत्रवर्गाणां

नामसङ्कीर्तन पूर्वकमेकैकशो विशदविवेचनमेवमभिहितम् जन्मसम्पद्विपत्क्षेम्यः प्रत्वरः साधकस्तथा ।

नवत्रिकेष्वत्र जातकस्य जन्मनक्षत्रादारभ्य क्रमशो नवनक्षत्राणि प्रतिवर्गनेकैकशो विभूषयन्ति। तदनन्तरं नक्षत्रनवकं यौनः प्रन्येन वारद्वायं प्रतिवर्गमैकेकसोडलङ्कुर्वन प्रतिवर्गगहं त्रिकं साधयति। अत एव नवन क्षत्रवर्गेषु प्रतिवर्ग क्रमेण दशममेकोनविंशश्च नक्षत्रमधितिष्ठानि । इत्यं नवत्रिकाणां चित्राङ्गनभधोऽद्धितरूपेणाऽत्र कर्तुं शक्यते जन्मनक्षत्रं प्रथमधिकृत्य जन्मवर्गेः सम्पतवर्गे विपतवर्गे, क्षेम्यवर्गे प्रत्वरवर्गे, साधकवर्गे, नैधनवर्गे, मैत्रक परममैत्रवर्गे

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| १० | ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ |
| १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ |

मतमिदमाथर्वणज्योतिषे श्लोकेषश्चकेनैवभभिहितम् दशमं जन्मनक्षत्रात् कर्मनक्षत्रमुच्यते ।

**दशमं जन्मनक्षत्रात् कर्मनक्षत्रमुच्यते ।**
**एकोनविंशतिश्चैव गर्भाधानकमुच्यते ।।**
**द्वितीयमेकादशमं विंशतिः सम्पत्करो गणः ।**
**तृतीयमेकविंशन्तु द्वादशन्तु विपत्करम् ।।**
**क्षेम्यं चतुर्थं द्वाविंशं भवेद् यच्च त्रयोदशम् ।**
**प्रत्वरं पञ्चमं विद्यात् त्रयोविंश चतुर्दशम् ।।**
**साधकं तु चतुर्विंश षष्ठं पञ्चदशञ्च यत् ।**
**नैधनं पञ्चविंशन्तु षोडशं सप्तमं तथा ।।**
**मैत्रे सप्तदशं विद्यात् षड्विंशतिश्चाष्टमम् ।**
**सप्तविंश परं मैत्रं नवमष्टादशञ्च यत् ।।**[३०]

आथर्वणज्योतिषे प्रोक्तमिदं किन्तु स्वल्पसञ्ज्ञावैमत्येन सम्पूर्ण ज्योतिषिशास्त्रेऽङ्गीकृतम्। किन्तु प्रथमवर्गस्याऽत्र जन्म-कर्म-आद्यान रूपेण यत् त्रिधाविभाजनं कृतम् अथ च अधमोत्पमसङ्कुल्पनं यदत्रोक्तं तहतु सर्वथा मौलिकं नवीनं वा प्रतिभाति । जन्मसञ्ज्ञकनक्षत्रवर्गेऽत्र केवलं जन्मनक्षत्र

जन्मसञ्ज्ञयाऽङ्गीकृत्य जन्मनक्षत्राद् दशमं नक्षत्रं कर्मनक्षत्रमु क्तमथ चैकोन विंश नक्षत्रं गर्भाधानक मुच्यते । उदाहरणार्थं स्वातीनक्षत्रजातकानां कृते स्वीतीतो दशमं शतभिषनक्षत्रं कर्मनक्षत्रमथ च एकविंशमाद्रा नक्षत्रं गर्भाधान सज्ज्ञकं भविष्यति एवमेवाऽन्वेषां नक्षत्रवर्गीयाणां नक्षत्रं गर्भाधान सञ्ज्ञकं भविष्यति एवमेवाऽन्वेषां नक्षत्रवर्गीयाणां नक्षत्र विषयेऽपि चिन्तनीयम् । दृष्टान्तरूपेण कृतिकानक्षत्रे जातानां जातकानां कृते प्रतिवर्ग नक्षत्र- त्रिकमत्र प्रस्तुयते-

| | | | |
|---|---|---|---|
| जन्मवर्ग- | कृतिका | उत्तराफाल्गुनी | उत्तराषाढा |
| सम्पदवर्गे | रोहिणी | हस्तः | श्रवण |
| विपदवर्गे | मृगशिरा | चित्रा | धनिष्ठा |
| क्षेम्यवर्गे | आद्रा | स्वाती | शतभिषा |
| प्रत्वरवर्गे | पुनर्वसुः | विशाखा | पूर्वाभाद्रपदम् |
| साधकवर्गे | पुष्यः | अनुराधा | उत्तराभाद्रपदा |
| नैधनवर्गे | आश्लेषा | ज्येष्ठा | रेवती |
| मैत्रवर्गे | मघा | मूलम | अश्वनी |
| परममैत्रवर्गे | पूर्वाफाल्गुनी | पूर्वाषाढा | भरणी |

आथर्वणज्यौतिषे निरूपितो नक्षत्रवर्गक्रमोऽयं व्याख्यान शैलीमधिकृत्य विस्तरतथा सम्पूर्ण एकस्मिन् प्रकरणे सुष्ठु निरूपितो जातः शीघ्रबोधादिपरवर्तीग्रन्थेषु नक्षत्रवर्गेऽयं तारावर्गरूपेणाऽतीवसङ्क्षिरततया सूत्रधियाऽऽख्यातः -

**नक्षत्रभाद्गण्येद् धीमान् क्रमाच्च दिनभावधि ।**
**नवभिस्तुं हरेद्भागं शेषं तारा विनिर्दिशेत् ।।**
**जन्मसम्पद्वि पत्क्षेमः प्रत्यरिः साधको वधः ।**
**मैत्राहिमैत्रताराः स्युस्त्रिरावृत्या नवैवहि ।।३१**

अर्थात् जातकस्य जन्मनक्षत्रात् सम्पाद्य कर्मदिवसनक्षत्रपर्यंन्त गणयेत् । यदि सा सङ्ख्या नवसङ्ख्या परिमिताऽस्ति तदा तेनैव क्रमेण तदेव नक्षत्रवर्गे ज्ञातव्यः । नक्षत्रसङ्ख्या नवसङ्ख्यामति क्रमति चेत् तदा नवभिर्विभज्य शेषसङ्ख्यापरिमितो नक्षत्रवर्गोऽङ्गीकार्यः । उदाहरणार्थं स्वाती नक्षत्रजातकानां कृते हस्तनक्षत्रं षड्विंश नक्षत्रमस्ति अतो नवभिर्विज्याऽठटसङ्ख्या शेषिता जाता अतो अस्त नक्षत्रमिदं स्वातीनक्षत्रे जातकानां कृतेऽष्टमे मैत्रवर्गेङ्गीकृत्य शोभनं भवि तुमर्हति ! जन्मनक्षत्रात् षडविंशमिदं नक्षत्रमाथर्वणज्योतिषेऽपि मेत्रवर्गेऽङ्गीकृत यतोक्तम्

**मैत्रे सप्तदशं विद्यात् षड्विंशतिश्चाष्टमम् ।।**[32]

आथर्वणज्यौतिषे प्रथमनक्षत्रवर्गस्थ त्रिधा विभाजनं कृत्वा यद्दशमं नक्षत्रं कर्मसञ्ज्ञकमुक्तं तदतु सर्वथा ग्राह्यमेव प्रतीयते यतो हि नवमे प्रकरणे प्रथमनक्षत्रवर्गं परिहर्तु निर्दिश्याऽपि दशमेप्रकरणे नक्षत्रवर्गाणां फलनिरूपण प्रसङ्गेऽस्य स्पष्ट परिहारो न कृतः तत्र तु केवलं जन्मनक्षस्याऽऽधानसञ्ज्ञकस्य च वर्णनं कृत्वा गणत्रयाणां निषेधो विहितः । अतः प्रतीयते यदग विपत्करो गणोऽपि अग्राहयो नाऽस्ति , यतोहि अनृताधर्मसंयुक्तेशत्रूणाभिचारिककर्मणा सार्द्धयेव दहनप्रहारादि कर्मसु गणोऽयं प्रशस्ता जातः-

**अनृताधर्मसंयुक्तं शत्रूणां चाऽभिचारिकम् ।**
**विपत्करे गणे कुर्यात् प्रहरेद्वा दहेत च ।।३४**

आथर्वणज्यौतिष तत्पदुवर्गेषु नक्षत्रगणेषु वा प्रशस्तानि कर्माण्यपि विस्तरतया प्रतिपादितानि । विद्यारम्भं तपोदानं मार्जनं भेषजक्रिया सुभृत्यानां भरणश्च सम्पत्करगणे कर्तव्यमव च क्षेम्यसज्ज्ञकंनक्षत्रवर्गे यात्रा कोष-वाहन-पोषणादि कर्माणि प्रथितांनि । साधकवर्गस्त भूरिशः प्रशंसितो जातः यथोक्तमत्र-

**असाध्यान्यपि कार्याणि साधयेत साधके गणे ।**
**सर्वार्थस्तस्य सिद्ध्यन्ति च चानर्थान् समश्नुते ।।**[36]

स्तूयचौलोद्वाहोपनयादिसंस्कारसम्पादनार्थं मैत्रवर्गीयानि नक्षत्राण्यथ च विविधस्तम्भनात्मकानि कर्माणि सर्वाभीष्टप्रदे परममैत्रगणेऽत्र भूयोभूयः प्रथिहानि-मैत्रे विवाहोद्वाहांश्च चूडोपनयानि च ।

**कुर्यात् परममैत्रे तु यतस्तम्भनात्मकम् ।**
**परंपरममैजेतु यद्यदभिलषेन्नरः**
**प्राप्नुयादर्थ सिद्ध्यन्ति क्षिप्रमेव न संशयः ।।**[37]

उयर्युक्तनक्षत्रवर्गेषु नक्षत्रगणेषु वा नक्षत्रपीडनमपि सुठठवत्र निभालिमथर्वणज्यौतिषे । अत एव एका दशे नक्षत्रपीडन प्रकरणे योगैः पीडिते सति तद्गणो विपरीत फलदायको भवति यथोक्तम् ।

**आधाने विद्रवन्त्यर्था व्याधयो कदाचिद् दशमे हते ।**
**सप्तत्करे हते हानिर्वृद्धिश्चैव विपत्करे ।**
**क्षेम्ये हते न प्रवसते, साधकेऽर्थान्न साधयेत् ।**
**प्रत्वरे तु हते विध्नान महारोगप्रणाशनम् ।**
**नैधनेव हते विध्नान् महानरिवधो भवेत् ।**
**मित्रवंर्गाश्च मैत्रेतु न भवन्ति यथा पुरा ।**
**हते परममैत्रे तु मनो नित्यं न तुठयति ।।**

अतः कश्च् शुभनक्षत्रवर्गमपि नक्षत्रं यदि हतमर्थात् पीडितञ्जातं तदा तन्नक्षत्रमभीष्टसाधकं ज भवति । एतस्मादेव , कारणाद् यस्मिन् यस्मिन् गणे यदा यदा यद्यन्नक्षत्रं पीडयते तदा-तदा तत् तन्ननक्षत्रेऽभि हितं कर्म न कर्तव्यमन्यथा तन्नक्षत्रमनिष्ठकारक मर्थ विहवंसकञ्च भवति, यथोक्तमत्रायर्वण ज्यौतिषे-

**यद्यत् पीडयते नक्षत्रं यस्मिन् यस्मिन् यदा गणे ।**
**तत् तत् कर्म न कुर्वीत पुरस्ताद् यदप्रणोदितम् ।।**[३९]

अतो दुष्टग्रहयोगादिभिरुल्काकम्पदाहैश्च पीडनं सम्यक् परीक्ष्य शुभनक्षत्रवर्गोयेषु नक्षत्रेषु तत्ततत्कर्मविहित नक्षत्र मधिकृत्यैव कर्माणि सम्पादनीयानि । आथवर्णज्यौतिषे तिथि-वार योग करण निरुपणपूर्वकं नक्षत्रगणोऽयं प्रकरणत्रये प्रथितो जातः । शश्यादिके विषये त्वत्र कोऽपि सङ्कुतो नोपलभ्येत अत एव वक्तुमिदं शक्यते यद् आथर्वण ज्यौतिषे जातकपद्धतेर्यद् विकासक्रम उपलक्ष्यते तत्तु नक्षत्राधृत एवाऽस्ति । अतः आथर्वणज्यौतिमस्ति नाक्षत्रज्यौतिषमिति मतं प्रबलतया पुष्णाति । यथोक्तमेव पूर्वं यत् ज्यौतिषशास्त्रे चन्द्रौ नक्षत्राधिपतिः प्रोक्तः अत एव चन्द्र सर्वोष्टकृठटः शतगुणोऽभिहितः तिथिरेकगुणा प्रोक्ता नक्षत्रश्च चतुर्गुणम् ।

**वारश्चाऽष्टगुणः प्रोक्तः करणं षोडशान्वितम् ।**
**द्वा त्रिंशद् गुणयोगश्च ताराषठिटसमन्विता ।**
**चन्द्रःशतगुणः प्रोक्तस्तस्माच्चन्द्रबलाबलम् ।।**[४०]

इन्दौ बलबत्वरे यद्यपि नक्षत्रप्राब्ल्यं नाऽपेक्षते ४१ तथाऽपि तृतीय-पञ्चम सप्तमगणे तारा क्लेशमेव प्रयच्छति ।

**यदि स्यात् सबलश्चन्द्रस्ताराऽपि क्लेशदायिनी ।**
**तृतीया पञ्चमी तादा सप्तमे च नृणां भवेत् ।।**[४३]

अतो ज्ञायते यच्चन्द्रस्याऽतीव प्राबल्येऽपि न नक्षत्रगणोऽयमुपेक्षितव्यः । प्रतिमासं चन्द्रस्तु प्रायश्चतुर्दश-पञ्चदशदिवसेठवेव शुक्लपक्षे वा प्रबलोऽङ्गीक्रियते अतः कृष्णपक्षे शशिनः प्रभावः ताराबलं तत्र विचारणीयम् ।

**विदेशजाते विकलौ च पत्यौ सर्वाणि कार्याणि करोति पत्नी ।।**[४३]

आथर्वणज्यौतिषस्यास्मिन् पद्ये पत्नीत्वं तु नक्षत्राणामेवाऽऽभाति । अतोः निष्कर्षरूपेण वक्तुमिदं शक्यते यन्नक्षत्रगणोऽयमाथर्वणज्यौतिषस्य जातकशास्त्रस्य होदा स्कन्धस्य वाऽऽधारोऽङ्गीकार्यः । परवर्तीकालेषु यद् द्वादशभावानां गुरुप्रवरेण सर्वविद्यापरङ्गतेन देवर्षिकल्पेनाऽऽचार्येण प्रो. वृजेशकुमार शुक्लवर्येण वेदाङ्ग ज्योतिषेऽलेरिव ।[४४] अतो होरास्कन्धे जातकपद्धतौ आथर्वण ज्यो..गतं नाक्षत्र ज्यौतिषमेव मौलिकं प्रतिभाति इत्यस्ति सर्वथा सिद्धम् ।।

## सन्दर्भाः


१. निरुक्तम् ३.२० क -वृहत्पाराशहोराशास्त्रम् ३.४
२. ऋग्वेदः १.५.२, ७.८६.१, १०.६८.११, १०.११७.७
तैत्विरीयसंहिता ४.४.१०, अथर्ववेदः११.६,१० १३.२.१७, १५.१७.५
३. अथर्ववेद ६.१२०.३
४. तदेव ५.२४.१०
५. तदेव ६.०६.२
६. तदेव १४.१.२ ऋग्वेद १०.८५.२
७. ऋग्वेद) १०.०५.१३, १०.६४.८
८. अथर्ववेदः ११.८.२
९. तैत्तिरीसंहिता ४.४.१०.१.६, काठकसंहिता ३९.१३
१०. आथर्वणज्यौतिषम् ९.३ तथा ९.१०
११. तदेव १.११
१२. तदेव १.१०
१३. शीघ्रबोधः २.१५४. ५५
१४. तदेव २.१०
१५. आथर्वणज्यौतिषम् २.९
१६. तदेव २.१०

१७. शीघ्रबोधः २. १५६.५७

१८. ऋग्वेदः १०.८५.१३, १०.६४.८

१९. नवानां त्रिकवर्गाणामाधाने जन्मकर्मणि
अधमोत्ममबर्गेषु संवदन्तीह भागशः
आथर्वण ज्यौतिषम् ९.३ तथा १०

२०. अथर्ववेद ६.११.२

२१. मुहूर्त चिन्तामणिः नक्षत्रप्रकरणम् -५२

२२. काठकसंहिता ३९.१३

२३. मुहूर्तचिन्तमणिः नक्षत्रप्रकरणम् -०८

२४. आथर्वणज्योतिषम् ९.२

२५. शीघ्रबोध २.२०२.३

२५. शीघ्रबोध २.२०२-३

२६. नवानां त्रिकवर्गाणांमाधाने जन्मकर्मणि ।
अधमोत्तमवर्गेषु संवदन्तीह भागशः (आथर्वणज्योतिषम् ९.१३

२७. तदेव ९.१०

२८. शीघ्रबोधः २.२००

२९. आथर्वण ज्यौतिषम् ९.४

३०. तदेव ९.५.९

३१. शीघ्रबोधः २.२०२.३

३२. आथर्वणज्योतिम् ९.९

३३. तदेव १०.२-४

३४. तदेव १०.६

३५. तदेव १०.५ तथा ७

३६. तदेव १०.९

३७. तदेव १०.११-१२

३८. तदेव ११.२-५

३९. तदेव ११.६

४०. तदेव ७.१४-१५

४१. न तत्र बलवती तारा यत्रेन्द्रर्बलवत्तरः ।
नहि भर्तृस्थितानारी क्वचित् स्वातन्त्रयमर्हति ।। (तदेव ७.१२)

४२. शीघ्रबोधः २.१०१

४३. आथर्वणज्यौतिषम् ७.१३

४४. संस्कृतवाङ्मय का वृहद इतिहास-वेदाङ्ग खण्ड पृ.४४६